श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
यादवाभ्युदये महाकाव्ये

# ॥ अष्टमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ अष्टमः सर्गः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

अथ प्रसूनायुधभागधेयान्यारब्धमन्दानिलसौतिकानि।
मधुप्रसङ्गात्मधुराणि यूनामनुष्णशीतान्यभवन्दिनानि॥ 8.1 ॥

अनेकरूपैः स्वयमेकरूपः कालात्मकं रूपमकालकाल्यः।
ऋतुप्रभेदैरनुभूय रेमे रामासखो राममनुप्रयातः॥ 8.2 ॥

हेमन्तपूर्वः शिशिरान्तिमश्च शरच्च संभूय वसन्तवृत्त्या।
शनैः शनैः शान्तिमुपेयिवांसः तद्वैभवात्तन्मयतामिवापुः॥ 8.3 ॥

प्रायेण पञ्चायुधपञ्चवक्त्रः पलाशकोशाकृतिमाददानैः।
मनस्विनीमानगजेन्द्रभेदात् सशोणितैः पाणिरुहैश्चकाशे॥ 8.4 ॥

जगन्ति पुण्ड्रेक्षुशरासनेन प्रसूनबाणैरपि जेतुमिच्छोः।
असूचयन्नात्मभुवः स्वनादैः अव्याहतामाशिषमन्यपुष्टाः॥ 8.5 ॥

वराङ्गनावक्त्रपदाम्बुजानां स्वाभाविकीं सौरभरागलक्ष्मीम्।
प्रपित्समानौ प्रसवैस्तदर्हं द्वेधा द्रुमौ दोहदमन्वभूताम्॥ 8.6 ॥

तीक्ष्णारुणाग्राण्यचिरप्ररोहात् चकाशिरे चम्पककुड्मलानि।
दत्तानि कामोत्सवमङ्गलार्थं दीपाङ्कुराणीव वसन्तलक्ष्म्या॥ 8.7 ॥

मुक्तापगामग्रसमुत्थितात्मा भूयो भजन्पुष्परजोभिषेकम्।
चचार मन्दं मलयाद्रिवातः चेतोभुवो दृप्त इवौपवाह्यः॥ 8.8 ॥

पुष्पेषु संयोगवियोगवृत्त्या क्रमाद्व्रजन्ती नतिमुन्नतिं च।
वनान्तरे षट्पदपङ्क्तिरासीत् मञ्जुस्वना मन्मथचापमौर्वी ॥ **8.9** ॥

वसन्तक्लृप्तान्मदनस्य बाणात् आन्दोलयन्नूनमनोकहेषु।
दिने दिने दक्षिणमातरिश्वा गतागताभ्यां गणयाञ्चकार ॥ **8.10** ॥

आघूर्ण्यमानैरभितो नभस्वान् कान्तैः प्रदीपैरिव कर्णिकारैः।
वनश्रियो माधवसङ्गमार्हं मङ्गल्यनीराजनमाचचार ॥ **8.11** ॥

प्रसूनहासाधर पल्लवानां किञ्जल्करोमाञ्चजुषामभुङ्क्त।
मन्दानिलैराहितवेपथूनां कान्तिं वसन्तो वनवल्लरीणाम् ॥ **8.12** ॥

विहारयोग्यामथ वीक्ष्य वन्यां रमापतिं रामसखं विशन्तम्।
नभश्चरैः साकमनोकहास्तं नाथं प्रसूनोर्मिभिरभ्यषिञ्चन् ॥ **8.13** ॥

पुष्पाकरेण प्रतिपन्नशोभं बृन्दावनं नन्दितगोपबृन्दम्।
प्रदर्शयन् प्रापित धेनुवत्सं रामानुजो राममिदं बभाषे ॥ **8.14** ॥

मनोभुवो मूर्तमिवावलेपं मान्यं मनस्कारमिव त्वदीयम्।
चिरं त्वया सेव्यमिहार्य मन्ये चित्रं वनं चैत्ररथाभिनन्द्यम् ॥ **8.15** ॥

अमानुष प्राप्यमरण्यमेतत् प्राप्तस्य ते पादरजःप्रभावात्।
सत्त्वोपपन्ना न भजन्ति सत्त्वाः शान्ताशयाः शाश्वतिकं विरोधम् ॥ **8.16** ॥

अचिन्त्य भूम्नस्तव सन्निधानात् अन्योन्य जातीयदशां दधानाः।
सिंहीवशास्तन्यविदो भजन्ते सुभ्रातृतां केसरिदन्तिपोताः ॥ **8.17** ॥

त्वदर्पितस्वादुतृणादिनीनां त्वद्वंशनादामृतपायिनीनाम्।
मन्ये गवां वत्सगणावृतानां विष्वग्वनं विश्रमयोग्यमेतत् ॥ **8.18** ॥

वसन्तलक्ष्म्या इव वासभूमिं सङ्कल्पयोनेरिव शिल्पशालाम्।
रतेरिवारामविभूतिमन्यां वन्यामिमां वेद्मि तवोपकार्याम् ॥ **8.19** ॥

वनस्थलीयं मकरन्दवर्षैः अतोयकर्मान्तिकमात्तसेका।
प्रस्तौति पर्याप्तपरागजाला समीहितं सञ्चरणोत्सवं ते॥ **8.20** ॥

नभःस्पृशामत्र महीरुहाणां नीडादमी निष्पतिताः सलीलम्।
प्रयुञ्जते स्वागतमञ्जसा ते प्रायः शुभालापजुषः शकुन्ताः॥ **8.21** ॥

वातावधूतास्तरवः स्वमूर्ध्ना सन्तान सान्तानिक संपदस्ते।
प्राज्यैरमी पुष्पफलैश्च नूनं वितन्वते वन्दनमर्हणां च॥ **8.22** ॥

आस्वाद्य चूताङ्कुरमन्यपुष्टाः प्रायः स्वनैः पञ्चममुद्गिरन्तः।
आकारयन्तीव वनं गतं त्वां दिव्यानमी दर्शयितुं प्रदेशान्॥ **8.23** ॥

त्वत्पाद विन्यास विशेष धन्याम् आपादयिष्यन्त इवात्मधात्रीम्।
एनां स्वशाखाग्रकरप्रयुक्तैः प्रचिन्वते भूमिरुहाः प्रसूनैः॥ **8.24** ॥

निशामयन्त्यो वनदेवतास्त्वां चकोरसम्मोहन चारुदीप्तिम्।
प्रीतिं प्रभूतां परिवाह्य गीतैः शीताश्रुणा शेषमिवोद्वमन्ति॥ **8.25** ॥

रसालरम्भादि भवैरिहैताः फलद्रवैः पिच्छिलपार्श्वभागाः।
वत्सावगाह्या वनराजिमध्ये पूर्णाः सुधाया इव भान्ति कुल्याः॥ **8.26** ॥

कह्लारपद्मोत्पलकान्तिभिस्ते कटाक्ष विक्षेपगुणं भजन्त्यः।
अरण्यभागानभितः प्रवाहैः आप्याययन्त्याप इमाः प्रसन्नाः॥ **8.27** ॥

त्वद्वक्त्रपद्मप्रतिमासहस्रैः संसृज्यमानेव सपुष्कराऽसौ।
प्रभावतः ख्यापितपुष्करश्रीः पुण्योदका पुष्करिणी विभाति॥ **8.28** ॥

सञ्चारजातैः श्रमवारिलेशैः आलक्ष्य मुक्तागुणमण्डनं त्वाम्।
व्यक्तं नदी वीजयतीयमारात् अम्भोरुहैराश्रित वीचिहस्तैः॥ **8.29** ॥

सहन्ति वातातपवर्षवातां स्तोयेषु तिष्ठन्ति रविप्रतीक्षाः।
तपस्यतस्त्वन्मुखकान्तिलोभात् पद्मानिमान् पश्चिमराम मन्ये॥ **8.30** ॥

तरङ्गिणीभिः परिरभ्य मुक्तः संलापवान् भृङ्गरवैरधीरैः।
आपृच्छते नूनमतः प्रयातं मन्दीभवन् कुन्द समीरणस्त्वाम्॥ **8.31** ॥

मनःप्रसादं तव दर्शयन्ती प्रालेयसङ्घातनिभैः पयोभिः।
शुद्धा नवेन्दीवरनीलवासाः छायेव ते शैवलिनी विभाति॥ **8.32** ॥

सह प्रयच्छन्ति तव प्रियाभिः चञ्चूर्यमाणा इव चक्रवाकाः।
आहूय दातार इवातिथेयाः कालोचितां कस्त्वमितीव वाचम्॥ **8.33** ॥

विधूतवालव्यजनाः स्वपक्षैः चारुस्वनापादित चाटुवादाः।
अभिन्नवर्णाः प्रतियन्त्यमी त्वां राजोपचारैरिव राजहंसाः॥ **8.34** ॥

दिवापि गोवर्धन निर्झराणां सञ्छादिते व्योम्नि तुषारजालैः।
इहातपश्चान्द्रमसेन धाम्ना विकल्प्यते बोधितपङ्कजोऽपि॥ **8.35** ॥

अतर्कित प्राप्तमवेक्ष्य कान्त्या मेघङ्करं मेचकमम्बरं ते।
निनाद निष्पादित षड्जगीता नृत्यन्त्यमी सानुषु नीलकण्ठाः॥ **8.36** ॥

नदीभिरारब्धतरङ्गलास्यं नादैर्युतं निर्झरदुन्दुभीनाम्।
गायद्द्विरेफं गिरिणा त्वदर्थं प्रायेण सङ्गीतमिह प्रयुक्तम्॥ **8.37** ॥

कलिन्दजाकच्छभुवां सखीभिः प्रच्छायवन्याभिरधित्यकाभिः।
सूते गिरिः सूचित नन्दनोऽसौ स्वर्गौकसां स्वैरविहारवाञ्छाम्॥ **8.38** ॥

अभ्यागतं वीक्ष्य भवन्तमारात् साला इमे सामिनताग्रशाखाः।
सुधारसस्वादुतमानि भक्त्या स्वयं प्रयच्छन्ति फलानि धन्याः॥ **8.39** ॥

पात्रीभवन्तस्तव वीक्षणानां पद्मालयावासविकल्पितानाम्।
चराचराः कानि कियन्ति वैते तपांस्यतप्यन्त भवान्तरेषु॥ **8.40** ॥

विजानतां सत्पुरुष प्रभावं पुंसाममी पुण्यतमीभवन्तः।
प्रायस्त्वदङ्गीकरणात्प्रयास्यन्त्याराध्यतामद्रिवनावकाशाः॥ **8.41** ॥

संस्कारपूताभिरितीव वाग्भिः सम्मोदयन्नग्रजमादिदेवः।
विजातलीलो विजहार हृष्यन् वन्द्यः सतां वत्सगणानुयायी॥ **8.42** ॥

स्वयंवृतः स्वैरविहारलक्ष्म्या मुहुर्वितेने विपिने मुकुन्दः।
स्थानान्तर प्राप्ति विभावितानि स्थितेरभिन्नानि गतागतानि॥ **8.43** ॥

प्रभूतया पुष्पफलप्रसूत्या वदान्यवृत्तीनि वनानि दृष्ट्वा।
सस्मार चिन्तावशवर्तिनीनां व्रजस्थितानां वरवर्णिनीनाम्॥ **8.44** ॥

प्रायस्तदाह्वानविधौ नियोक्तुं प्रगृह्य वेणुं प्रतिपन्नदूत्यम्।
न्यवेशयत् कुड्मलिते सलीलं बिम्बाधरे सूचितचित्तरागे॥ **8.45** ॥

सामोपपन्नान् क्रमशः स्वरन्ध्रैः सप्त स्वरान्सप्तभिरुद्वमन्तम्।
प्रचक्रमे वादयितुं वनान्ते वंशं प्रियो वल्लववंशजानाम्॥ **8.46** ॥

मुकुन्दवक्त्रानिलवाद्यमानो वेणुर्बभौ वेद इव द्वितीयः।
रागावधीनां रहसां यदेकं गीतात्मनां तस्य निदानमासीत्॥ **8.47** ॥

तद्वंशनादः सुभगोऽनुगच्छन् अग्रे सरन्सौरभमागमानाम्।
अयत्ननिष्पन्न मनः समाधीन् आब्रह्मकानातनुतेव जन्तून्॥ **8.48** ॥

शृण्वद्भिरुद्भ्रान्तमधुप्रवाहं वंशस्वनं तस्य सुधैकवंशम्।
सयूथ्यतां नूनमवाप्य सर्वैः सत्त्वैः स्थितं सामिनिमीलिताक्षैः॥ **8.49** ॥

मधुद्रवैरुल्बण सम्मदाश्रूण्यालेख्यनिष्पन्दमृगद्विजानि।
उदग्रकोशोत्पुलकानि कृष्णो वंशीनिनादेन वनान्यकार्षीत्॥ **8.50** ॥

आस्वाद्य तद्वंशनिनादमाध्वीं आघ्राय तत्सञ्चरसौरभं च।
भुक्तामृतानां भुवि सौरभेय्यः क्षिप्तेतरां क्षीबदशामवापुः॥ **8.51** ॥

वंशस्वनास्वाद वशीकृतानां व्यक्तोदयानां वनदेवतानाम्।
स कर्बुरः स्निग्धतमैः कटाक्षैः सेन्द्रायुधो मेघ इवाबभासे॥ **8.52** ॥

आध्मापयामास स शृङ्गमग्र्यं शङ्ख तथाभूतमिवात्मयोगात्।
जगौ च गेयानि बहूनि येषां गान्धर्व वेदोऽपि न पारदृश्वा ॥ **8.53** ॥

त्रिस्थानयुक्तस्वरभूषितं तत् त्रिधा स्थितं ग्रामविशेषयोगात्।
अरञ्जयत्सप्तजगन्त्ययत्नात् गीतं हरेराहृत किन्नरौघम् ॥ **8.54** ॥

विलास वाक्यैरिव वेणुनादैः दिव्येन गीतेन च दैत्यहन्तुः।
निवेदितार्थाः सुदृशः स्ववासात् आजग्मुराकर्षण मन्त्रतीक्ष्णैः ॥ **8.55** ॥

अनिष्टशब्दैर्वलयैरपोढाः काञ्च्याप्यवज्ञातपदोपगत्या।
गुणावकृष्टाः प्रियमाप्तुमीषुः कामोपदिष्टेन महापथेन ॥ **8.56** ॥

आदिश्यमानां प्रियवंशनादैः आशां निजाशामिव निर्विघाताम्।
तदास्थितां प्रास्थिषताशु धन्याम् आसन्नसन्ध्याधिकरागभाजः ॥ **8.57** ॥

मधुव्रताधिज्यशरासनेन पुष्पात्मकं सन्दधता पृषत्कम्।
अनुप्लवेन व्रजता बभूवे तासामनङ्गेन तदोद्यतानाम् ॥ **8.58** ॥

आदेशयोगैरथ तत्र गोप्यो निवार्यमाणा अपि दुर्निवाराः।
आनिन्यिरे रागमयैर्महौघैः क्लेशापहं कृष्णसुधापयोधिम् ॥ **8.59** ॥

त्वरासखीनां पुरतः प्रचेले तरस्विना निःश्वसितेन तासाम्।
सदागति प्रार्थनया समेतं दूरस्थितं कृष्णमिवोपनेतुम् ॥ **8.60** ॥

प्रायेण वेगात्सुदृशां विभिन्नः प्रकीर्णमुक्ताफलपुष्पजालः।
प्रस्तावयन् कामविहारनाट्यं हारः समालक्ष्यत सूत्रधारः ॥ **8.61** ॥

अवस्थितं क्वापि कदम्बमूले वल्गुस्मितं वादित मञ्जुवेणुम्।
साचीकृताक्षं ददृशुस्तरुण्यः स्वाद्यं सतां स्वस्तिकचारुजङ्घम् ॥ **8.62** ॥

तदङ्गशोभामवलोक्य दिव्यां विस्मेरभावं व्रजतेव दूरात्।
अमोहयद्यौवतमादिधूर्तः सन्तोषदिग्धेन समीक्षणेन ॥ **8.63** ॥

द्रुतागतिव्याकुल भूषणास्ताः किञ्चित् समुच्छ्वासितनीविबन्धाः।
पर्याकुलाक्ष्यः परिवार्य तस्थुः कृष्णं कृपाधीनदृशं कृशाङ्ग्यः॥ **8.64** ॥

स वल्लभः संसदि वल्लवीनां बर्हस्रजा दर्शितदानराजिः।
उदग्रशृङ्गध्वनिराबभासे दृप्तो वशानामिव वारणेन्द्रः॥ **8.65** ॥

अवृद्धिसङ्कोचमिवेन्दुमन्यां अकार्मुकं काममिवात्तवेणुम्।
तमद्भुतानामिव राशिमेकं गोप्यस्तदात्मान इवान्वभूवन्॥ **8.66** ॥

सुराङ्गनाभिः समये धृतायां स्वेनैव गोपाकृति भूमिकायाम्।
अकर्मवश्यस्य विभोस्तदासीत् अर्चाफलस्पर्शनमात्र लीला॥ **8.67** ॥

न खल्वमुष्य प्रमदामदान्ध्यं न कुत्सनं तत्तदभीष्टदातुः।
न धर्मसंस्थापनबाधगन्धः शुद्धानुचिन्त्या हि शुभस्य लीला॥ **8.68** ॥

अनागमप्रत्यय संभवानां गुरुत्यजां गोपकुमारिकाणाम्।
अनन्यसङ्गात् स दयालुरासीत् असङ्गघण्टापथसार्थवाही॥ **8.69** ॥

पुष्पावचायप्रवणेन गोप्यः प्रसाधितास्तेन स च प्रियाभिः।
अभिन्नबाह्यान्तरमैकरस्यात् आमोदमन्योन्यसगन्धमापुः॥ **8.70** ॥

स्वलालनादापतितं स तासां सौभाग्यदुर्मानमदं विनेष्यन्।
पुष्पावचायव्यपदेशलौल्यात् आसीद्दवीयानबहिःस्थितोऽपि॥ **8.71** ॥

अविप्रकर्षेऽपि तिरस्करण्या क्लृप्तावृतिं कृष्णमनीक्षमाणाः।
भीमैरदूयन्त भृशं तरुण्यः क्षणैः स्वनिश्वाससमीरदीर्घैः॥ **8.72** ॥

पुष्पावकीर्णेषु वनद्रुमाणां मूलेषु मोहालसचेतसस्ताः।
कृतासिकाः कृष्णवियोगखेदात् कामास्त्रपर्यङ्कगता इवासन्॥ **8.73** ॥

विलीनचित्ता विषमास्त्रतापात् विलापयन्त्यो वसुधां विलापैः।
अदृश्यरूपस्य हरेरगायन् गुणांश्चरित्राणि च गोपकन्याः॥ **8.74** ॥

मुकुन्द विश्लेषविमोहितानां संश्रूयमाणानि मुहुर्वनान्ते।
शमप्रदान्यात्मविदामभूवन् त्रय्यन्तगन्धीनि वचांसि तासाम्॥ **8.75**॥

स माययात्मानमसौ परेषां प्रच्छाद्य सन्दर्शयति प्रसादात्।
इतीममर्थं प्रथयन्प्रियाणां दृष्टिं शुभां दातुमियेष तासाम्॥ **8.76**॥

तासामथ स्मेरमुखाम्बुजेन श्यामेन पीताम्बर चित्रितेन।
आविर्बभूवे सहसा पुरस्तात् मधुद्विषा मन्मथमन्मथेन॥ **8.77**॥

तमेकचित्ताः प्रतिसन्निवृत्तं यातेन नृत्यन्तमिवाद्भुतेन।
गोप्यः पुनर्जातमिवात्मनैव प्रैक्षन्त सम्मोदपयोधिमग्नाः॥ **8.78**॥

नवेन्दुरेखा कृशपाण्डुराङ्गीः तापाश्रुसन्दर्शित वाह्नितोयाः।
ददर्श गोपीरवतारगोपः श्वासैस्त्रिलोकीमिव शोषयन्तीः॥ **8.79**॥

अविध्यतैकः प्रणयापराधी योगैरलक्ष्यो युगपत्प्रयुक्तैः।
आवर्जित भ्रूधनुषाममोघैः एणीदृशामीक्षण चित्रपुङ्खैः॥ **8.80**॥

प्रसाद जीवातुभिरङ्गनानां प्रत्येकमन्याभिरलक्षणीयैः।
विलासचाटूक्तिविलोकनाद्यैः आनन्दयन् सान्त्वनमाचचार॥ **8.81**॥

तासां तदङ्गव्यतिषङ्गलोभात् सैरन्ध्रिका वृत्तिमुपेयुषीणाम्।
विरक्त निध्येयपदः स रागी रागाधिकां प्रास्तुत रासलीलाम्॥ **8.82**॥

तदग्रहस्त ग्रहणार्थिनीनां स सव्यतो दक्षिणतश्च तिष्ठन्।
बभार विद्युद्व्यवधानभाजां वात्याजुषां वारिमुचामभिख्याम्॥ **8.83**॥

द्वयोर्द्वयोरेकतया स तासां मध्ये स्थितो मण्डलरासनृत्ते।
करद्वयस्पर्शरसेन कान्ताः प्रत्येकमानन्द्य भृशं ननन्द॥ **8.84**॥

अपारमावर्तयता रसाब्धिं रामानुजो रासजवेन दीव्यन्।
पदाश्रितानां भ्रमशान्तिहेतुः प्रियासहस्रं भ्रमयाञ्चकार॥ **8.85**॥

स्वमायया घूर्णयतो महत्या विश्वानि भूतानि विभोरजस्रम्।
रामाजनं रासवशं विधाय स्वस्य स्वयं प्राप निदर्शनत्वम्॥ **8.86**॥

स्वपादपांसुस्नपिताकृतीनां स्विद्यन्मुखीनां व्रजसुन्दरीणाम्।
लम्बालकानां ललितस्मितानां लाभात्स्वयं लब्ध मनोरथोऽभूत्॥ **8.87**॥

सनृत्तगीतेन विहारयूना गोपीजनैरन्तरितेन बद्धम्।
तदद्भुतप्रस्थिति रासचक्रं जवादलक्ष्यान्तरमाबभासे॥ **8.88**॥

जगुः सहर्षं दिवि देवकन्याः दिव्यास्तदा दुन्दुभयः प्रणेदुः।
पपात कल्पद्रुम पुष्पवृष्टिः सदर्चिते संश्रितरासलीले॥ **8.89**॥

गृहीतहस्तद्वितयाः सलीलं मिथ्याभुजङ्गेन मृगीदृशस्ताः।
परिभ्रमन्त्यो विपरीतवृत्त्या प्रक्रान्तरासां भुवमभ्यजानन्॥ **8.90**॥

मनोज्ञमल्लीहसितेन तासां रम्येण कृष्णो रजनीमुखेन।
अन्यादृशीं प्रीतिमनन्ययोगात् आपादयिष्यन्विरराम रासात्॥ **8.91**॥

उद्भिन्नघर्माम्बुकणं विहारात् तासां करस्पर्शरसेन चैनम्।
लतागृहे नन्दन गर्भशोभिन्यासीनमन्वासत गोपकन्याः॥ **8.92**॥

स्वलम्भितैश्चित्रपलाशपुष्पैः संवीज्यमानो विटपैः प्रियाभिः।
निदर्शयामास वनान्तराले नीलाद्रिमुद्भ्रान्त मयूरबृन्दम्॥ **8.93**॥

विचित्रलीलाहितवेपथूनां तासामनासादित विश्रमाणाम्।
तापोपशान्त्यै तपनात्मजायां आह्लादनीमद्भिरियेष लीलाम्॥ **8.94**॥

मुखेन तस्य द्विजराजभासा ताराभिरामेण तमोपहेन।
प्रेमोदधिं वर्धयता प्रियाणां सञ्चिक्षिपे तत्र सरोजकान्तिः॥ **8.95**॥

सन्ध्याघनाभः स तदा प्रियाणां मध्ये बभौ वारिजरेणुताम्रैः।
शृङ्गारदिग्धैरिव दृष्टिपातैः शृङ्गोदकैराप्लुत चित्रदेहः॥ **8.96**॥

स पद्मिनीनां सलिलस्थितानां चकार सम्मीलनमाशु तासाम्।
तुषारजालैस्तुहिनांशुसौम्यः कामोपनेता करयन्त्रमुक्तैः॥ **8.97** ॥

पटीरपङ्कैः प्रतिपन्नगङ्गां शोणान्वितां कुङ्कुमसङ्गमेन।
कस्तूरिकाभिः प्रचितात्मवर्णां कृष्णप्रियाः कृष्णनदीं वितेनुः॥ **8.98** ॥

अकालजातप्रतिमेन्दुजालान् आकीर्णमिथ्याशफरांस्तरङ्गान्।
वक्त्राक्षिवक्षोरुहबिम्बयोगात् अकल्पयन् कल्पित चक्रवाकान्॥ **8.99** ॥

सविभ्रमा चारुपयोधराभा ताभिः समं सूर्यसुता प्रपेदे।
अलब्धपूर्वं तदनन्यलभ्यं कृष्णोपभोगेन कृतार्थभावम्॥ **8.100** ॥

नितम्बवक्षोजनिरूढवृद्धिः मध्ये कृशा संश्रितनिम्ननाभिः।
विलोलपद्माग्रतरङ्गहस्ता तासामभूदन्य तमेव साऽपि॥ **8.101** ॥

असूययेव प्रमदाजनानां लाक्षाञ्जनादीनि विलोपयन्ती।
निसर्गशोभातिशयप्रकाशात् कृतोपकारेव नदी बभूव॥ **8.102** ॥

चिरप्रवृद्धं दयितेऽनुरागं चित्ते दुरासेधमिवोद्वमन्ती।
प्रायेण तत्कान्ति मधूपभोगात् दृष्टिस्तदा रागमुवाह तासाम्॥ **8.103** ॥

अनङ्ग रागोज्ज्वल चित्तदेहा विश्वाधिकं विव्यधुरायताक्ष्यः।
कह्लारशोभारचितैः कटाक्षैः कामस्य बाणैरिव तापदीप्तैः॥ **8.104** ॥

विगाहनाद्वोपनितम्बिनीनां संवर्धमाने सहसाऽम्बुपूरे।
तद्वक्त्रशोभाविजितैः सरोजैः अन्तर्हितं नूनमवाप्तलज्जैः॥ **8.105** ॥

कृष्णाम्बुदः कल्पितहस्तयन्त्रः चकार गोपीनयनोत्पलेषु।
धाराम्बुसेकादुपसंभवन्त्या रागश्रिया रक्तसिलीन्ध्रशोभाम्॥ **8.106** ॥

मुहुःप्रयुक्तां मुखपुण्डरीके कदर्थयन्त्या करयन्त्रधाराम्।
कान्ते कयाचिद्दधिरे कराभ्यां गतागतान्युत्पलकाननानाम्॥ **8.107** ॥

प्रयापिते गोपिकया कयाचित् कृष्णाननं कीचकयन्त्रतोये।
निमीलनोन्मीलनतस्तदीयात् नक्तन्दिवं तत्क्षणदृश्यमासीत्॥ **8.108** ॥

तमार्द्रभावान्निबिडान्तरीयं लम्बालकं राशिमिवाद्भुतानाम्।
पश्चादुपेता परिरभ्य तस्थौ काचित्प्रिया कामवधूरिवान्या॥ **8.109** ॥

अभङ्गुरप्रेमबलेन तस्याः बद्धं प्रियं बाहुलताद्वयेन।
समीक्ष्य कामार्पितपाशमन्याः संप्लावयामासुरपेतशङ्काः॥ **8.110** ॥

यदङ्घ्रियोगाज्जगतां त्रयाणां मन्दाकिनी मान्यतमा बभूव।
तयापि संभाव्यतमा तदासीत् कृष्णेन सा तेन कृतावगाहा॥ **8.111** ॥

अथोपचारानुपपादयन्ती दिव्येन देहेन दिनेशकन्या।
आनर्च पादार्पित रत्नपुष्पा गोपीसखं गोपकुमारमाद्यम्॥ **8.112** ॥

सरिद्भिरन्याभिरपि प्रभावात् प्रायेण गोपीतनुमाश्रिताभिः।
तोषादुदन्वत्सुतयोप भोग्यः तोयोपचारेण विभुः सिषेवे॥ **8.113** ॥

तमुत्तरन्तं सरितः प्रवाहात् उत्तारकं पङ्कमयात्पयोधेः।
मरुत्प्रयुक्ता वसनाङ्गरागैः आकल्पयन्नप्सरसस्तदर्हैः॥ **8.114** ॥

व्रजाङ्गनाश्च त्रिदशाङ्गनाभिः प्रसाध्यमाना बहुमानपूर्वम्।
रमासहाय प्रणयानुरूपां सम्माननां साधुजनेष्वविन्दन्॥ **8.115** ॥

विहृत्य तस्मिन् व्रजसम्मुखीने चक्रं गवां शैलवनान्निवृत्तम्।
उपाद्रवत्कश्चिदरिष्टनामा कैलासपर्याय तनुः ककुद्मान्॥ **8.116** ॥

खुराग्रवज्रेण विदारयन्क्ष्मां विषाणनिर्भिन्नविमानमूलः।
दुर्वारवेगो ददृशे स दूरान् मृत्योरुपक्रान्तमहो महोक्षः॥ **8.117** ॥

शृङ्गावरुग्णैः शकटैः प्रकीर्णं वृषान्तरैराशु विमुक्तमार्गम्।
व्रजं तदा विप्लुतगोपवर्गं त्यक्त्वा स कृष्णाभिमुखं जगाम॥ **8.118** ॥

तमापतन्तं प्रतिसञ्जिहानो निर्ह्लादवित्रासितदीनधेनुम्।
विषाणयुग्म ग्रहणेन शौरिः चक्रे विनिष्पीडित पीनकण्ठम्॥ **8.119** ॥

अपहत्य दुर्जयमरिष्टदानवं
जगतामरिष्टमिव जातविग्रहम्।
व्रजसद्भिरद्भुत विहारतोषितैः
सुरसत्तमैरपि समं स तुष्टुवे॥ **8.120** ॥

अन्यैरप्यसुरमलिम्लुचैरनेकैः
आतङ्कान्स्थिरचरसूतिभिः प्रसूतान्।
गोपानां प्रतिविदधे गवां च काले
रामेण स्तुतचरितो रथाङ्गपाणिः॥ **8.121** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
यादवाभ्युदये महाकाव्ये अष्टमः सर्गः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥